**JAIN COLLEGE, Bangalore**

**Mock Paper – 1, February - 2015**

**II PUC – संस्कृतम्**

**समयावकाशः** – ३.१५ निमेषाः **गरिष्ठाङ्काः** - १००

---

**I. एकवाक्येन संस्कृतभाषया उत्तरं लिखत |** **10 × 1 = 10**

1. विश्वस्य मातरः का?
2. विक्रमादित्यः कथं देशान्तरं गतः?
3. माकन्दिका नाम नगरी कुत्रास्ति?
4. पौरवः कः ?
5. राणाप्रतापस्य पूर्वजानाम् अमात्यः कः?
6. महाश्वेता स्नातुं कुत्रागच्छति ?
7. सुन्दरः नगरं किमर्थम् आगच्छति ?
8. कर्णस्य गुरुः कः ?
9. कामधेनुगुणा का ?
10. कृष्णशास्त्रिणाम् अध्यापकेषु एकस्य नाम लिखत ।

**II. द्वित्रैः वाक्यैः कन्नडभाषया आङ्गलभाषया वा उत्तरं लिखत |** **5 × 2 = 10**

11. पुराणभारते उल्लिखितानि तीर्थक्षेत्राणि कानि ?
12. राजपुत्र मञ्जूषां प्रप्य किं करोति ?
13. बाल्ये शास्त्रिणां संस्कृताध्ययनम् ?
14. भारतसर्वकारः रणाप्रतापाय कथं गौरवम् असूचयत् ?
15. पुण्डरीकस्य अनुरागं महाश्वेता कथं जानाति ?
16. कर्णं प्रति परशुरामोपदेशं लिखत ।
17. सत्पुरुषव्रतं किम् ?

**III. पाठनाम उल्लिख्य, श्लोकानाम् अनुवादं कन्नडभाषया आङ्गलभाषया वा कुरुत |** **3 × 3 = 9**

18. आयुः प्रमाणं लभते हि राजन् द्वीपेषु सर्वेषु नरो मयोक्तम् ।
    कृत्वा शुभं कर्म तु भारतेऽस्मिन् द्वीपेषु सर्वेषु नराः प्रयान्ति ॥
19. तथेति प्रतिपाद्यैतद् गत्वा सोऽथ वणिग्भयात् ।
    नक्तं चक्रे तथा सर्वं निर्विमर्शा हि भीरवः ॥
20. अतः परीक्ष्य कर्तव्यं विशेषात्सङ्गतं रहः ।
    अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥
21. धन्योऽस्मि गमनात्पूर्वमीदृशी सम्पदागता ।
    विना तु गुरुशुश्रूषां नान्यद्भाव्यं परं मम ॥
22. विषयामिषलोभेन मनः मनः प्रेरयतीन्द्रियम् ।
    तन्निरुन्ध्यात् प्रयत्नेन जिते तस्मिन् जितेन्द्रियः ॥

**IV. पाठनाम उल्लिख्य, कः कं प्रति अवदत् इति संस्कृतभाषया उत्तरं लिखत ।** **4 × 2 = 8**

23. यो दुःखी स सुहृदि दुःखं निवेद्य सुखी भवति ।
24. मम हस्ते प्रभूतं धनमस्ति ।
25. किं मां अन्यथा सम्भावयसि ?

26. अहो! गुरुकुलवैभवम् ।

27. सः यत्रकुत्रापि वा भवतु कालेज् आनेतव्यः एव ।

28. अनार्य, अत्मनो हृदयानुमानेन पश्यसि ।

**V. दशवाक्यैः संस्कृतभाषया, कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत | 5 × 5 = 25**

29. भारतवर्षस्य भौगोलिकचित्रणं कुरुत ।

30. विक्रमादित्यस्य प्रभावेण राक्षसः कथं परिवर्तितः?

31. दीर्घापाङ्गः।

32. भामहस्य राजभक्तिः ।

33. पुण्डरीकस्य जन्मवृत्तान्तं लिखत ।

34. शान्तिदर्शनात् तरुणस्य चिन्तासन्ततिः ।

35. विद्यार्थिनां कृते शास्त्रिणां सन्देशः ।

36. कर्णपरशुरामयोः संवादः ।

**VI. मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत । 4 × 1 = 4**

37. द्वीपेषु सर्वेषु .. .. .. प्रयान्ति ।

38. उपन्यस्तदीपायां .. .. .. .. क्षिप्यतां त्वया ।

39. विद्या .. .. .. .. रक्ष्यते ।

40. सर्वाः सगन्धेषु .. .. .. .. ।

| योगेन, गङ्गायां ,विश्वसिति, नराः |
|---|

**VII.** 41. **संयोजयत ।** **4 × 1 = 4**

| **कः** | **खः** |
|---|---|
| दुष्यन्तः | कामवशगाः |
| ललाटे | पौरवः |
| अलङ्कारमिव | कुङ्कुमम् |
| परिव्राड् | ब्रह्मचर्यस्य |
| | काण्वशिष्यः |

**VIII. रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत । 3 × 1 = 3**

42. उद्योगाः अस्मत् प्रतीक्षायां न तिष्ठन्ति ।

43. भगवतः सुन्दरं रूपमासीत् |

44. वैदैशिकाः वाणिज्यार्थम् आगच्छन्ति स्म ।

45. अनुचराः प्रव्राजकस्य वचनम् अपालयन् ।

46. प्रमदा परिणेतुः समीपे इष्यते ।

**IX.** **यथा निर्देशं कुरुत ।** **4 × 3 = 12**

47. **सन्धिं विभजयत / योजयत ।**

यदीह, मयैवम्, अस्त्र+अभ्यासः= , ग्रामस्य+एव= ।

48. **विग्रहवाक्यं / समस्तपदं लिखत ।**

ज्ञानभण्डारः, क्रोदाग्निः, मनुजः पशुः इव, गुरोः प्रसादं, ।

49. **लिङ्ग–विभक्ति–वचनानि लिखत ।**

पादयोः, तस्याम्, सलिलम्, तेजसा ।

50. **लकार–पुरुष–वचनानि लिखत ।**

भवन्तु, धारयन्ति, अब्रवीत्, बभूव ।

51. **पदपरिचयं कुरुत ।**

अदाय, भवितुम्, पतित्वा, संरक्ष्यः ।

52. **प्रयोगं परिवर्तयत ।**

त्वया किमेतत् आचरितम् ।

अथवा

अहं दशमकक्षां पठितवान् ।

53. **अलङ्कारं सलक्षणं निर्दिशत ।**

त्वम् असत्यवादीव प्रतिभासि ।

अथवा

अस्याः आननारविन्दे अपूर्वाकषणमासीत् ।

54. **कन्नडभाषया–आङ्लभाषया वा अनुवदत ।** **5**

भारतीयसंस्कृतिः विश्वस्य सर्वासु संस्कृतिषु प्राचीना, श्रेष्ठा, प्रेष्ठा च इति सर्वैः विद्वद्भिः स्वीक्रियन्ते । यदा विश्वस्य अन्येषां देशानां निवासिनः सभ्यताहीनाः, सस्कृतिविहीनाः च स्वजीवनयापनं कुर्वन्तः आसन्, तस्मिन्नेव काले भारतीया संस्कृतिः परमोत्कृष्टा विराजमाना च आसीत् । अत्र विचारस्वातंत्र्यं, सदाचारपालनं, धार्मिकता, दुःखसहिष्णुता, ज्ञानप्राअधान्यं, विश्वबन्धुत्वस्थापनं चेत्यादयः विषेषगुणाः विराजन्ते । अतः एव भारतीया संस्कृतिः सर्वैः प्रशंस्यते ।

55. **संस्कृतभाषया अनुवदत ।** **5**

**ಪ್ರತಿಯೊಂದು ಕಾರ್ಯದ ವಿಜಯದ ಮೂಲ ಆತ್ಮವಿಶ್ವಾಸವಾಗಿರುವುದು. ಅದು ಮಾನವನಿಗೆ ಅವನ ಗುರಿಯನ್ನು ತೋರಿ, ಅದನ್ನು ಸಾಧಿಸಲು ದಾರಿಮಾಡಿಕೊಡುತ್ತದೆ. ಎಲ್ಲಾ ಕಾರ್ಯಗಳ ಮೂಲಶಕ್ತಿಯು ಇದೇ ಆಗಿದೆ. ಅದು ಶಕ್ತಿಯ ಧಾರೆಯನ್ನು ನಮ್ಮೊಳಗೆ ಹರಿಸಿ, ಕಷ್ಟಸಾಧ್ಯಕೆಲಸವೂ ಸಹ ಸಾಧ್ಯವಾಗುವಂತೆ ಮಾಡುತ್ತದೆ. ಪ್ರತಿಯೊಬ್ಬ ಮಾನವನ ಆಪ್ತಮಿತ್ರ ಆತ್ಮವಿಶ್ವಾಸ. ಮಾನವನು ಗಳಿಸಬೇಕಾದ ಹಾಗೂ ಸಂಗ್ರಹಿಸಬೇಕಾದ ಸಂಪತ್ತು ಇದೇ ಆಗಿದೆ. ದಿನದಿಂದ ದಿನಕ್ಕೆ ಇದನ್ನು ಹೆಚ್ಚಿಸಿಕೊಳ್ಳುವುದು ಪ್ರತಿಯೊಬ್ಬ ಮಾನವನ ಕರ್ತವ್ಯವಾಗಿದೆ.**

Self confidence is the success behind all the works. It shows the aim and paves the way to attain it. It is the strength behind all the deeds. It makes a stream of energy to flow within us which makes possible even the difficult mission which seems impossible. It is the best friend of each and every human being. This is real wealth to be acquired and accumulated. It is the duty of every human being to increase this day by day.

56. **A) परिच्छेदमिमं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** **5**

आसीत् कश्चित् बालकः । सः एकम् आरामं गत्वा तत्र एकस्मिन् आम्रवृक्षे मनोहरं फलं दृष्ट्वा तत् अपचेतुम् ऐच्छत् । परन्तु बहवः कण्टकिनः गुल्माः आसन् । तेभ्यः भीत्वा फलम् अनपचित्य गृहं गतः । तदा अन्यः बालकः तत् फलं दृष्ट्वा परिगतेभ्यः कण्टकिभ्यः गुल्मेभ्यः अभीत्वा वृक्षमारुह्य फलमपचित्य भक्षयामास । अतः धैर्यवतो भाग्यमुपैति ।

***प्रश्नाः** –

१. बालकः आरामं गत्वा किं कर्तुम् ऐच्छत् ?

२. वृक्षं परितः के आसन् ?

३. गुल्मेभ्यः भीतः बालकः किमकरोत् ?

४. अन्यः बालकः वृक्षमारुह्य किं चकार ?

५. अस्याः कथायाः नीतिः का ?

**अथवा**

**B) पुस्तकप्रेषणाय पुस्तकप्रकाशनं प्रति पत्रम् लिखत ।**

**❖ शुभं भूयात् ❖**

**JAIN COLLEGE, Bangalore**

**Mock Paper – 2, February - 2015**

**II PUC – संस्कृतम्**

**<u>समयावकाशः</u>** – ३.१५ निमेषाः **<u>गरिष्ठाङ्काः</u>** - १००

---

I. <u>एकवाक्येन संस्कृतभाषया उत्तरं लिखत</u> :- 10 X 1 = 10

1. "द्वादशस्तोत्रम्" – केन रचितम् ?
2. परदुःखेन के अत्यन्तदुःखिनः भवन्ति ?
3. राजपुत्रः मञ्जूषायाः अन्तः कं निक्षिपति ?
4. शारद्वतः कः ?
5. विधिना दर्शितं प्रभुत्वम् इति का वदति ?
6. कर्णस्य रक्षाकवचं किम् ?
7. कर्णस्य गुरुः कः ?
8. सत्क्रिया किं रक्ष्यते ?
9. के धनमिच्छन्ति ?
10. कृष्णशास्त्रिमहोदयेन आरब्धा पत्रिका का ?

II. <u>द्वित्रैः वाक्यैः उत्तरं संस्कृतेन कन्नडभाषया आङ्ग्लभाषया वा लिखत</u> :- (पञ्चानामेव) 5 X 2 = 10

11. संस्कृताध्ययने शास्त्रिणाम् अभिप्रायः ।
12. कोषः किमर्थं संरक्ष्यः ?
13. वज्राख्यः कीटः किं करोति ?
14. कालिदासस्य कृतयः ।
15. प्रव्राजकः निजान् अनुचरान् किम् उवाच ?
16. विस्मितः राक्षसः विक्रमादित्यं किं पृच्छति ?
17. शास्त्रिणां पाठ्यक्रमः ।

III. <u>पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नडभाषया आङ्ग्लभाषया वा कुरुत</u> :- (त्रयाणामेव) 3 X 3 = 9

18. यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
    तथा पुराकृतं कर्म कर्तारमनुगच्छति ॥
19. धनहीनो न हीनस्स्यात् धनिकः स सुनिश्चयः ।
    विद्यारत्नेन यो हीनः स हीनस्सर्ववस्तुषु ॥
20. अस्त्रप्रयोगवेलायां यदा ते सूतभावना ।
    तदा सर्वाणि चास्त्राणि भवेयुर्निष्फलानि हि ॥
21. कुतो धर्मक्रियाविघ्नः सताम् रक्षितरि त्वयि ।
    तमस्तपति घर्मांशौ कथमाविर्भविष्यति ॥
22. प्रविष्टो जातु भिक्षार्थमेकस्य वणिजो गृहे ।
    स ददर्श शुभां कन्यां भिक्षामादाय निर्गताम् ॥

IV. <u>पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत</u> :- (चतुर्णामेव) **4 X 2 = 8**

23. यं कमेव मा भक्षय ।
24. उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ।
25. अहो ! भग्नप्रतिज्ञोऽस्मि ।
26. परीक्षार्थं इतोऽपि समयावकाशः विद्यते ।
27. दृढीक्रियतां चेतः ।
28. अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ।

V. <u>दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत</u> :- **5 X 5 = 25**

29. दीर्घापाङ्गप्रसङ्गः ।
30. प्रव्राजकः ।
31. विक्रमादित्यस्य परोपकारगुणं वर्णयत ।
32. कर्णशापप्रसङ्गः ।
33. शास्त्रिणां शिष्यवात्सल्यम् ।

VI. <u>रिक्तस्थानं उचितशब्दैः पूरयत</u> :- **4 X 1 = 4**

34. अनुचराः ___________ वचनम् अपालयन् ।
35. __________ न सुखं न निद्रा ।
36. सर्वः सगन्धेषु ____________ ।
37. भवादृशाः गुरवः अतीव __________।

VII. <u>संयोज्य लिखत</u> :- **4 X 1 = 4**

| | **अ** - | **इ** |
|---|---|---|
| 38. | कृष्णशास्त्री | दुष्यन्तः |
| 39. | नागराजन् | कुवेम्पु |
| 40. | विद्या | गुरुशापम् |
| 41. | पौरवः | गुप्तधनम् |

VIII. <u>रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत</u> :- **3 X 1 = 3**

42. <u>ऋषयः</u> प्रसन्नमुखाः दृश्यन्ते ।
43. कन्या <u>मञ्जूषायां</u> प्रवेशिता ।
44. <u>विमर्शकेन</u> कृतीनाम् अध्ययनं सम्यक् कर्तव्यम् ।
45. परिव्राट् <u>मौनं</u> त्यक्त्वा उक्तवान् ।
46. नवाम्रवापी <u>नरकं</u> न पश्येत् ।

IX. <u>यथानिर्देशं कुरुत</u> :- (चतुर्णामेव) **4 X 3 = 12**

47 **सन्धिं विभज्य नाम लिखत** :- तावदस्माभिः , अद्यैव , विवाहोऽस्याः

48 **विग्रहवाक्यं लिखत** :- जाह्नवीतटे , अनुद्धताः , जितेन्द्रियः

49 **लकार-पुरुष-वचनानि लिखत** :- वर्जयेत् , विद्यते , ददर्श

50 **पदपरिचयं कुरुत** :- निक्षिप्य , प्रविष्टः , प्रवेशयितुम्

51 **प्रयोगं परिवर्तयत** :- विधिना दर्शितं प्रभुत्वम् ॥

52 **लिङ्ग-विभक्ति-वचनानि लिखत** :- पौरवैः , महाशयस्य , विद्या

**X. 53** कन्नडभाषया आङ्ग्लभाषया वा अनुवदत :- **5**

क्रीडा मानवस्य नितराम् आवश्यकी । क्रीडया शक्तिः वर्धते । उल्लासः उत्पद्यते । आरोग्यं जायते । मनः विकसति । जीवनोत्साहः एधते । एकताभावः सम्पद्यते । मैत्री विस्तारं गच्छति, अतः खलु ज्येष्ठाः एकघण्टापर्यन्तं समानशीलवयोभिः क्रीडितव्यमिति उपदिशन्ति स्म ॥

**XI. 54** संस्कृतभाषया अनुवदत :- **5**

Kartikeya, the destroyer of demon Taraka, is the younger son of Lord Shiva. Ganesha, the remover of obstacles is His elder son. Kubera, the Lord of wealth is his friend. Parvathi, the mother of Universe is His wife. Parvatharaja, the king of mountains is His father-in-law. Nandi is His vehicle. Veerabhadra is his chief of army. In spite of all this Lord Shiva begs. What a destiny !

**XII.** इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत :- **5 X 1 = 5**

श्रीविजयीन्द्रतीर्थः इति सन्यासी कुम्भकोणम् इति पत्तने न्यवसत् । सः सर्वविद्यासु पारङ्गतः आसीत् । तस्य च महोदयस्य "चतुरधिकशतग्रन्थरत्नप्रणेता" इति प्रथा अवर्तत । तस्य च प्रियतमः सुहृत् आसीत् महावैय्यकरणिः श्री अप्पय्यदीक्षितमहोदयः । श्रीविजयीन्द्रतीर्थः सदा भगवतः श्रीरामस्य पूजने आराधने च आसक्तः अभवत् । अयञ्च सन्यासी एकदा कुम्भकोणे जनसम्मर्दे एकस्मात् देवालयात् अन्यं देवालयं प्रति सामान्ये तन्तौ योजनपर्यन्तं गच्छन् सर्वान् जनान् मूकविस्मितान् चकार कलासु स्वचातुर्यं च प्रदर्शयामास । तस्माद् दिनात् अयं परिव्राट् "अजय्य विजयिन्द्रः" इति प्रसिद्धः जातः । अयम् वेदान्ती सर्वान् वादिनः जित्वा सर्वत्र 'विजयीन्द्र' इति अन्वर्थं नाम अभजत । अयमेव पूज्यानां श्रीराघवेन्द्रस्वामिनां परमगुरुः इति ज्ञातव्यमस्माभिः ॥

55 श्रीविजयीन्द्रस्वामी कुत्र वसति स्म ?

56 महाव्याकरणशास्त्रज्ञः कः आसीत् ?

57 अत्र सन्यासी इति शब्दस्य कः पर्यायशब्दः प्रयुक्तः ?

58 राघवेन्द्रस्वामिनां परमगुरुः कः ?

59 विजयीन्द्रस्वामिनः आसक्तिः कुत्र अवर्तत ?

**॥ शुभं भूयात् ॥**